श्री शिव भुजंग स्तोत्रं

श्री शिव भुजंगं

गलद्दानगंडं मिलद्भृंगषंडं
चलच्चारुशुंडं जगत्त्राणशौंडं |
कनद्दंतकांडं विपद्भंगचंडं
शिवप्रेमपिंडं भजे वक्रतुंडं || 1 ||

अनाद्यंतमाद्यं परं तत्त्वमर्थं
चिदाकारमेकं तुरीयं त्वमेयं |
हरिब्रह्ममृग्यं परब्रह्मरूपं
मनोवागतीतं महःशैवमीडे || 2 ||

स्वशक्त्यादिशक्त्यंतसिंहासनस्थं
मनोहारिसर्वांगरत्नोरुभूषं |
जटाहींदुगंगास्थिशम्याकमौळिं
पराशक्तिमित्रं नुमः पंचवक्त्रं || 3 ||

शिवेशानतत्पूरुषाघोरवामा-
-दिभिः पंचभिर्हृन्मुखैः षड्भिरंगैः |
अनौपम्य षट्त्रिंशतं तत्त्वविद्या-
-मतीतं परं त्वां कथं वेत्ति को वा || 4 ||

प्रवालप्रवाहप्रभाशोणमर्धं
मरुत्वन्मणिश्रीमहःश्याममर्धं |
गुणस्यूतमेतद्वपुः शैवमंतः
स्मरामि स्मरापत्तिसंपत्तिहेतुं || 5 ||

स्वसेवासमायातदेवासुरेंद्रा-
-नमन्मौलिमंदारमालाभिषक्तं |
नमस्यामि शंभो पदांभोरुहं ते
भवांभोधिपोतं भवानीविभाव्यं || 6 ||

जगन्नाथ मन्नाथ गौरीसनाथ
प्रपन्नानुकंपिन्विपन्नार्तिहारिन् |
महःस्तोममूर्ते समस्तैकबंधो
नमस्ते नमस्ते पुनस्ते नमोऽस्तु || 7 ||

विरूपाक्ष विश्वेश विश्वादिदेव
त्रयीमूल शंभो शिव त्र्यंबक त्वं |
प्रसीद स्मर त्राहि पश्यावमुक्त्यै
क्षमां प्राप्नुहि त्र्यक्ष मां रक्ष मोदात् || 8 ||

महादेव देवेश देवादिदेव
स्मरारे पुरारे यमारे हरेति |
ब्रुवाणः स्मरिष्यामि भक्त्या भवंतं
ततो मे दयाशील देव प्रसीद || 9 ||

त्वदन्यः शरण्यः प्रपन्नस्य नेति
प्रसीद स्मरन्नेव हन्यास्तु दैन्यं |
न चेत्ते भवेद्भक्तवात्सल्यहानि-
-स्ततो मे दयालो सदा सन्निधेहि || 10 ||

अयं दानकालस्त्वहं दानपात्रं
भवानेव दाता त्वदन्यं न याचे |
भवद्भक्तिमेव स्थिरां देहि मह्यं
कृपाशील शंभो कृतार्थोऽस्मि तस्मात् || 11 ||

पशुं वेत्सि चेन्मां तमेवाधिरूढः
कलंकीति वा मूर्ध्नि धत्से तमेव |
द्विजिह्वः पुनः सोऽपि ते कंठभूषा
त्वदंगीकृताः शर्व सर्वेऽपि धन्याः || 12 ||

न शक्नोमि कर्तुं परद्रोहलेशं
कथं प्रीयसे त्वं न जाने गिरीश |
तथाहि प्रसन्नोऽसि कस्यापि कांता-
-सुतद्रोहिणो वा पितृद्रोहिणो वा || 13 ||

स्तुतिं ध्यानमर्चां यथावद्विधातुं
भजन्नप्यजानन्महेशावलंबे |
त्रसंतं सुतं त्रातुमग्रे मृकंडो-
-र्यमप्राणनिर्वापणं त्वत्पदाब्जं || 14 ||

शिरोदृष्टिहृद्रोगशूलप्रमेह-
-ज्वरार्शोजरायक्ष्महिक्काविषार्तान् |
त्वमाद्यो भिषग्भेषजं भस्म शंभो
त्वमुल्लाघयास्मान्वपुर्लाघवाय || 15 ||

दरिद्रोऽस्म्यभद्रोऽस्मि भग्नोऽस्मि दूये
विषण्णोऽस्मि सन्नोऽस्मि खिन्नोऽस्मि चाहं |
भवान्प्राणिनामंतरात्मासि शंभो
ममाधिं न वेत्सि प्रभो रक्ष मां त्वं || 16 ||

त्वदक्ष्णोः कटाक्षः पतेत्र्यक्ष यत्र
क्षणं क्ष्मा च लक्ष्मीः स्वयं तं वृणाते |
किरीटस्फुरच्चामरच्छत्रमाला-
-कलाचीगजक्षौमभूषाविशेषैः || 17 ||

भवान्यै भवायापि मात्रे च पित्रे
मृडान्यै मृडायाप्यघघ्न्यै मखघ्ने |
शिवांग्यै शिवांगाय कुर्मः शिवायै
शिवायांबिकायै नमस्त्र्यंबकाय || 18 ||

भवद्गौरवं मल्लघुत्वं विदित्वा
प्रभो रक्ष कारुण्यदृष्ट्यानुगं मां |
शिवात्मानुभावस्तुतावक्षमोऽहं
स्वशक्त्या कृतं मेऽपराधं क्षमस्व || 19 ||

यदा कर्णरंध्रं व्रजेत्कालवाह-
-द्विषत्कंठघंटाघणात्कारनादः |
वृषाधीशमारुह्य देवौपवाह्यं
तदा वत्स मा भीरिति प्रीणय त्वं || 20 ||

यदा दारुणाभाषणा भीषणा मे
भविष्यंत्युपांते कृतांतस्य दूताः |
तदा मन्मनस्त्वत्पदांभोरुहस्थं
कथं निश्चलं स्यान्नमस्तेऽस्तु शंभो || 21 ||

यदा दुर्निवारव्यथोऽहं शयानो
लुठन्निःश्वसन्निःसृताव्यक्तवाणिः |
तदा जह्नुकन्याजलालंकृतं ते
जटामंडलं मन्मनोमंदिरं स्यात् || 22 ||

यदा पुत्रमित्रादयो मत्सकाशे
रुदंत्यस्य हा कीदृशीयं दशेति |
तदा देवदेवेश गौरीश शंभो
नमस्ते शिवायेत्यजस्रं ब्रवाणि || 23 ||

यदा पश्यतां मामसौ वेत्ति नास्मा-
-नयं श्वास एवेति वाचो भवेयुः |
तदा भूतिभूषं भुजंगावनद्धं
पुरारे भवंतं स्फुटं भावयेयं || 24 ||

यदा यातनादेहसंदेहवाही
भवेदात्मदेहे न मोहो महान्मे |
तदा काशशीतांशुसंकाशमीश
स्मरारे वपुस्ते नमस्ते स्मरामि || 25 ||

यदापारमच्छायमस्थानमद्भि-
-र्जनैर्वा विहीनं गमिष्यामि मार्गं |
तदा तं निरुंधन्कृतांतस्य मार्गं
महादेव मह्यं मनोज्ञं प्रयच्छ || 26 ||

यदा रौरवादि स्मरन्नेव भीत्या
व्रजाम्यत्र मोहं महादेव घोरं |
तदा मामहो नाथ कस्तारयिष्य-
-त्यनाथं पराधीनमर्धेंदुमौळे || 27 ||

यदा श्वेतपत्रायतालंघ्यशक्तेः
कृतांताद्भयं भक्तवात्सल्यभावात् |
तदा पाहि मां पार्वतीवल्लभान्यं
न पश्यामि पातारमेतादृशं मे || 28 ||

इदानीमिदानीं मृतिर्मे भवित्री-
-त्यहो संततं चिंतया पीडितोऽस्मि |
कथं नाम मा भून्मृतौ भीतिरेषा
नमस्ते गतीनां गते नीलकंठ || 29 ||

अमर्यादमेवाहमाबालवृद्धं
हरंतं कृतांतं समीक्ष्यास्मि भीतः |
मृतौ तावकांघ्र्यब्जदिव्यप्रसादा-
-द्भवानीपते निर्भयोऽहं भवानि || 30 ||

जराजन्मगर्भाधिवासादिदुःखा-
-न्यसह्यानि जह्यां जगन्नाथ देव |
भवंतं विना मे गतिर्नैव शंभो
दयालो न जागर्ति किं वा दया ते || 31 ||

शिवायेति शब्दो नमःपूर्व एष
स्मरन्मुक्तिकृन्मृत्युहा तत्त्ववाची |
महेशान मा गान्मनस्तो वचस्तः
सदा मह्यमेतत्प्रदानं प्रयच्छ || 32 ||

त्वमप्यंब मां पश्य शीतांशुमौळि-
-प्रिये भेषजं त्वं भवव्याधिशांतौ |
बहुक्लेशभाजं पदांभोजपोते
भवाब्धौ निमग्नं नयस्वाद्य पारं || 33 ||

अनुद्यल्ललाटाक्षिवह्निप्ररोहै-
-रवामस्फुरच्चारुवामोरुशोभैः |
अनंगभ्रमद्भोगिभूषाविशेषै-
-रचंद्रार्धचूडैरलं दैवतैर्नः || 34 ||

अकंठेकलंकादनंगेभुजंगा-
-दपाणौकपालादफालेनलाक्षात् |
अमौळौशशांकादवामेकलत्रा-
-दहं देवमन्यं न मन्ये न मन्ये || 35 ||

महादेव शंभो गिरीश त्रिशूलिं-
-स्त्वयीदं समस्तं विभातीति यस्मात् |
शिवादन्यथा दैवतं नाभिजाने
शिवोऽहं शिवोऽहं शिवोऽहं शिवोऽहं || 36 ||

यतोऽजायतेदं प्रपंचं विचित्रं
स्थितिं याति यस्मिन्यदेकांतमंते |
स कर्मादिहीनः स्वयंज्योतिरात्मा
शिवोऽहं शिवोऽहं शिवोऽहं शिवोऽहं || 37 ||

किरीटे निशेशो ललाटे हुताशो
भुजे भोगिराजो गले कालिमा च |
तनौ कामिनी यस्य तत्तुल्यदेवं
न जाने न जाने न जाने न जाने || 38 ||

अनेन स्तवेनादरादंबिकेशं
परां भक्तिमासाद्य यं ये नमंति |
मृतौ निर्भयास्ते जनास्तं भजंते
हृदंभोजमध्ये सदासीनमीशं || 39 ||

भुजंगप्रियाकल्प शंभो मयैवं
भुजंगप्रयातेन वृत्तेन क्लुप्तं |
नरः स्तोत्रमेतत्पठित्वोरुभक्त्या
सुपुत्रायुरारोग्यमैश्वर्यमेति || 40 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ शिव भुजंगं |